रिपुः an enemy

बिन्दुः a drop

रघुः name of a king of the solar race

मृत्युः death

बाहुः an arm

मनुः the Hindu legislator

शम्भुः the God Siva

अम्बु water

वटुः a boy, lad, youth, a religious student

मठः (मठं) the hut of an ascetic, a monastery

उद्यानपालः a gardener

नकुलः a mungoose

वज्रं (वज्रः) Indra's thunderbolt, a diamond

मार्जारः a cat

कुटुम्बं a family

नलः name of a monkey chief, son of Visvakarman

मुखं the mouth

कपोलः cheek

पराक्रमः exploit

कृतज्ञता gratitude

क्षत्रियः a member of the military caste

आलवालं a basin for water round the root of a tree

सर्पः a serpent

दृढतम (*adj.*) hardest

वेदः the Veda, the sacred scripture of the Hindus

अलस (*adj.*) dull, heavy slow

प्रस्तरः a stone

क्रोधसम (*adj.*) (क्रोधः anger and सम equal, same) equal to anger

धीर (*adj.*) wise, courageous

रहस् *ind.* secretly, privately

परशुरामः a celebrated Brahmana warrior, son of Jamadagni

गणपतिः name of Ganesa

Roots.

1st Conjugation.

लप् *with* सम् *Paras.* to speak, to prate, whisper.

ग्रस् *Atm.* to eat; हृ with प्र *Paras & Atm.* to strike.

गर्ह् *Atm.* to think meanly of, to spurn.

व्यथ् *Atm.* to be pained, to suffer pain.

नी *with* प्र *Paras. & Atm.* to compose, write, to lay down.

6th Conjugation.

क्षिप् *with* प्रति *Paras.* to throw or cast into.

विश् *with* अभि & नि (अभिनिविश्) *Atm.* to resort to, to settle in, to occupy.

सिच् (सिञ्च्) *Paras. & Atm.* to sprinkle.

10th Conjugation.

भर्त्स् *Atm.* to reproach, to menace.

गण् *Paras. & Atm.* to count, to reckon.

ज्ञा *with* आ *Paras. & Atm.* (आज्ञापय्) to direct, to command.

EXERCISE 13.

वस्तुषु वज्रो दृढतमः ।
विष्णुर्नम्यते ।
अम्बुनः कमलानि जायन्ते ।
सूनुः कुटुम्बं रक्षति ।
राहुश्चन्द्रं ग्रसते ।
जलेन तरुं सिञ्चति ।
दुःखेन व्यथते दयालुः ।

शिशवः प्रस्तरान् प्रत्यक्षिपन् ।
समुद्रे सेतुर्नलेनाबध्यत ।
अलसं शिष्यं भर्त्सयते गुरुः ।
मठे भिक्षुर्वसति ।
नकुलः सर्पस्य शत्रुः ।
भ्रमराः कुसुमेषु मधु पिबन्ति ।
स्तेना वस्तूनि चोरयन्ति ।

दस्युर्धनं चोरयति ।

धर्म*मभिनिविशते साधुः ।

खल एव गर्हते साधुं ।

मुमुक्षुर्मोक्षाय यतते ।

प्रभुर्भृत्यमाज्ञापयति ।

नास्ति क्रोधसमो रिपुः ।

शत्रुमाह्वयति युद्धाय वीरः ।

आखूनां मांसं मार्जारा भक्षयन्ति ।

मयूरास्तरूणां शाखासु नृत्यन्ति ।

वटवो गुरुभ्यो वेदानशिक्षन्त ।

तरोरालवालमुद्यानपालेन क्रियते । ‡

बन्धुना सह रहः संलपति ।

EXERCISE 14.

Even (a) drop of water does not fall from (the) cloud.

(The) sweetness of honey pleased Rama.

Tears flowed down from (the) cheecks of (the) woman.

---

* विश् with अभिनि governs the accusative, अभिनिविशते सन्मार्गं 'he pursues the path of goodness', rarely this governs the locative. अविनिविशते पापे 'fondly resorts to sin'.

‡ The 3rd person singular present passive of कृ Par. and Atm. "to do" 8th conj. is क्रियते, active from being करोति.

(The) fear of death is not reckoned by (the) courageous.

(The three) worlds were conquered by Ravana with (the) prowess of his arms.

Parasurama struck off (the) heads of many Kshatriyas with (an) axe.

(The) duties of men were laid by Manu.

Gratitude is seen even in beasts.

(The) servants were commanded by (their) masters.

Arjuna conquered (his) enemies.

Ganapathy is (the) son of Sambhu.

Raghu fought with Indra.

LESSON IX.

Masculine and Neuter nouns ending in ऋ.

(ऋकारान्ताः पुल्लिंग नपुंसकलिंग शब्दाः)

TERMINATIONS.

Masculine nouns ending in ऋ.

	Singular	*Dual*	*Plural.*
Nom.	स्	औ	अस्
Acc.	अम्	औ	न्
Instr.	आ	भ्याम्	भिस्
Dat.	ए	भ्याम्	भ्यस्
Abl.	*(none)*	भ्याम्	भ्यस्
Gen.	*(none)*	ओस्	नाम्
Loc.	इ	ओस्	सु

The terminations for the *Neuter* nouns ending in ऋ are the same as those of the *Neuter* nouns ending in उ. (vide page 40).

धातृ *Mas.* 'the creator'.

Nom.	धाता*	धातारौ	धातारः

	Singular	*Dual*	*Plural.*
Acc.	धातारम्	धातारौ	धातॄन्†
Instr.	धात्रा	धातृभ्याम्	धातृभिः
Dat.	धात्रे	धातृभ्याम्	धातृभ्यः
Abl.	धातुः‡	धातृभ्याम्	धातृभ्यः
Gen.	धातुः	धात्रोः	धातृणाम्$
Loc.	धातरि§	धात्रोः	धातृषु
Voc.	धातः	धातारौ	धातारः

पितृ *Mas* 'father'

Nom.	पिता	पितरौ	पितरः
Acc.	पितरम्	पितरौ	पितॄन्
Voc.	पितः	पितरौ	पितरः

The rest like धातृ.

नृ *Mas.* 'a man'.

Nom.	ना	नरौ	नरः
Acc.	नरम्	नरौ	नॄन्
Instr.	न्रा	नृभ्याम्	नृभिः

	Singular.	*Dual.*	*Plural.*
Dat.	न्रे	नृभ्याम्	नृभ्यः
Abl.	नुः	नृभ्याम्	नृभ्यः
Gen.	नुः	न्रोः	*नृणां or नॄणां
Loc.	नरि	न्रोः	नृषु
Voc.	नः	नरौ	नरः

कर्तृ *Neu.* 'doer'.

Nom.	कर्तृ	कर्तृणी	कर्तॄणि
Acc.	कर्तृ	कर्तृणी	कर्तॄणि
Instr.	कर्तृणा	कर्तृभ्याम्	कर्तृभिः
Dat.	कर्तृणे	कर्तृभ्याम्	कर्तृभ्यः
Abl.	कर्तृणः	कर्तृभ्याम्	कर्तृभ्यः
Gen.	कर्तृणः	कर्तृणोः	कर्तॄणाम्
Loc.	कर्तृणि	कर्तृणोः	कर्तृषु
Voc.	कर्तः or कर्तृ	कर्तृणी	कर्तॄणि

* धातृ + स् = धात् + ऋ + स्

---

(26) In nouns of agency like धातृ, दातृ, and नेतृ the final ऋ is vriddhied (i. e. changed to आर्) and

in nouns of relationship like पितृ, भ्रातृ, जामातृ, देवृ, सव्येष्टृ, and नृ (except नप्तृ 'a grandson' भर्तृ 'a husband' and स्वसृ 'a sister') it is guṇated (i e. changed to अर्) before the terminations of the nominative and of the singular and dual of the accusative.

By the above rule धात् + आर् + स्

(27) The र् of आर् and अर् is dropped in the Nominative singular and to compensate in the last case अ is lengthened, the termination स् being dropped in both cases (i. e. in nouns of agency and relationship).

Hence धात् + आ (र् and the termination स् being dropped) = धाता 'the creator'.

† धातृ + न् (Mas acc. *plu.* tern.) = धात् + ऋ + न्

(2?) The preceding ऋ is lengthened before न्.

धात् + ॠ + न् = धातॄन्

$ धातृ + नाम् (Mas. Gen. *plu.* tern.) = धात् + ऋ + नां

By rule (37) S. F. R. धात् + ॠ + नां

" (25) " धात् + ॠ + णां = धातॄणां

‡ धातृ + *none.*

(29) उर् is substituted for final ऋ in the ablative and genitive singular.

धात् + उर् = धातुर् = धातुः

§ धातृ + इ = धात् + ऋ + इ

(30) The final ऋ is gunated (changed to अर्) in the Locative and Vocative singular.

धात् + अर् + इ = धातरि

‡ नृ + नां

(31) The preceding short vowel becomes optionally lengthened before नां.

Hence नृणां or नॄणां

Substantives. (*Masculine and Neuter*).

Masculine.		*Masculine and Neuter.*	
जामातृ	son in-law	द्रष्टृ	seer
पितृ	father, (*du*) parents	कर्तृ	doer, author
नप्तृ	a grandson	नेतृ	a leader, a carrier
नृ	a man	दातृ	donor, giver, a liberal man
धातृ	the creator		
भर्तृ	husband, master	स्रष्टृ	the creator

‡ नृच (VI—4—6).

Masculine

भ्रातृ a brother

त्वष्टृ the architect of the gods

होतृ a sacrificial priest whose duty it is to repeat the Mantras

देवृ husband's brother

Masculine and Neuter.

वक्तृ an orator, a speaker

द्वेष्टृ hater, an enemy

श्रोतृ hearer

गन्तृ goer

रक्षितृ protector, defender

जेतृ conqueror

WORDS.

श्वशुरः a father-in-law

मन्त्रः a Vedic verse

दण्डकारण्यं a forest named Dandaka

मरणं death

विश्वं the universe

ऋष्यशृंगः the son-in-law of Dasaratha

श्रेष्ठ *adj*. best, supreme

यज्ञः a sacrifice

अनिष्टं evil, calamity

युधिष्ठिरः the eldest son of Pandu

पतिव्रता a chaste and virtuous wife

कर्णः (1) name of a hero (2) the ear

निर्बन्धः importunity

ROOTS.

स्निह् *4th conj. Paras* to feel affection for.

सृज् *6th conj. Paras.* to abandon or create.

कथ् *10th conj. Paras. & Atm.* to tell.

EXERCISE 15.

ऋषयो मन्त्राणां द्रष्टारः ।
वक्तारं श्लाघन्ते जनाः ।
बालकाः पितरमन्वरुध्यन्त ।
विश्वस्य* कर्तारं वन्दे ।
भर्तुर्मरणेन नारी भूषणानि मुञ्चति ।
त्वष्टेन्द्रस्य शत्रुं पुत्रमैच्छत ।
अरीणाञ्जेतारं भूपतिं प्रजा अनुरुध्यन्ते ।
होता यज्ञे मन्त्रान् शंसति ।
युधिष्ठिरोऽर्जुनस्य भ्राता ।
पितुराज्ञया रामो दण्डकारण्यं प्राविशत् ।
श्वशुरो जामातरि स्निह्यति ।
पुत्राय कुप्यति पिता ।
दातॄणां श्रेष्ठः कर्णः ।
भर्तारमनुसरति पतिव्रता ।
ऋष्यशृंगो दशरथस्य जामाता ।
दाता दरिद्राय धनं यच्छति ।
रावणो राक्षसानां नेता ।
नरो धात्राऽसृज्यन्त ।
पुत्रस्य पुत्रा नप्तारः सन्ति ।

---

* This word is declined like a pronoun.

EXERCISE 16.

(The) sun and (the) moon were created by (the) creator.

Beggars get money from (the) liberal man.

(The) Kauravas do not bear (the) happiness of (their) haters.

Rama feels affection for in (his) brother Lakshmana.

(I) told (the) story at (the) importunity of (the) hearers

Among (all the) brothers Yudhistra is (the) best.

(The) water of (the) river was drunk by (the) passengers on (their) way.

Sitha followed (her) husband's brother.

Vishnu is (the) protector of (the) universe.

(The) givers of food are praised by (the) poets.

(The) doers of evil are punished by gods.

(The) speaker extoled (the) virtues of (the) king.

LESSON X.

Feminine nouns ending in इ and उ.

(इकारोकारान्त स्त्रीलिंग शब्दाः)

गति (*f*) 'mode of walking'.

	Singular.	*Dual.*	*Plural.*
Nom.	गतिः	गती	गतयः
Acc.	गतिम्	गती	गतीः*
Instr.	गत्या†	गतिभ्याम्	गतिभिः
Dat-	गत्यै or गतये	गतिभ्याम्	गतिभ्यः
Abl.	गत्याः or गतेः	गतिभ्याम्	गतिभ्यः
Gen.	गत्याः or गतेः	गत्योः	गतीनाम्
Loc.	गत्याम् or गतौ	गत्योः	गतिषु
Voc,	गते	गती	गतयः

धेनु (*f*) 'a cow'.

Nom.	धेनुः	धेनू	धेनवः
Acc.	धेनुम	धेनू	धेनूः*
Instr.	धेन्वा†	धेनुभ्याम	धेनुभिः

	Singular	*Dual*	*Plural.*
Dat.	धेन्वै or धेनवे	धेनुभ्याम्	धेनुभ्यः
Abl.	धेन्वाः or धेनोः	धेनुभ्याम्	धेनुभ्यः
Gen.	धेन्वाः or धेनोः	धेन्वोः	धेनूनाम्
Loc.	धेन्वाम् or धेनौ	धेन्वोः	धेनुषु
Voc.	धेनो	धेनू	धेनवः

(32) * The terminations of the accusative plural of feminine nouns ending in इ or उ is स्, before which the final vowel is lengthened.

Hence गति + स्, by rule (32) above गती + स् = गतीः. Similarly धेनूः

(33) † The termination of the instrumental singular of feminine nouns ending in इ or उ is आ.

Hence गति + आ = गत् + इ + आ, by rule (35) S. F. R. गत् + य् + आ = गत्या, Similarly धेन्वा.

(34) The forms of the feminine nouns ending in इ or उ for the dative, ablative, genitive, and locative singulars are optionally made up by the addition of the terminations of the feminine nouns ending in ई (i. e. dat. ऐ, abl. आस्, gen. आस्, loc. आम्, vide pages (6 and 11).

(35) Feminine nouns ending in इ or उ are declined like the corresponding masculine in other cases.

Feminine nouns ending in इ.

गतिः mode of walking, state, condition

प्रीतिः affection, pleasure

भीतिः fear, danger

नीतिः politics, honesty

मुक्तिः absolution, emancipation

शुक्तिः an oyster-shell, pearl-oyster

धृतिः courage

प्रकृतिः (1) nature
(2) ministry

स्मृतिः remembrance, Hindu law books

रतिः pleasure, the wife of the God of love

भक्तिः devotion, worship

प्रवृत्तिः predilection, information, intelligence

भूमिः ground, the earth

रात्रिः night

शान्तिः peace, tranquillity

कान्तिः light, splendour

जातिः caste, kind, race

पद्धतिः a mode, a way

श्रुतिः hearing, the Vedas

श्रेणिः (श्रेणी) a line

वृद्धिः prosperity

कीर्त्तिः renown, fame

वृतिः a hedge

भित्तिः a wall

वसतिः place of residence

बुद्धिः intellect, talent
षष्टिः (*always plural*) sixty
वर्तिः a wick
सुकृतिः a virtuous or good deed
भूतिः prosperity, wealth

Feminine nouns ending in उ.

तनुः (तनूः) the body
चञ्चुः (चञ्चूः) a beak
रज्जुः a rope
धेनुः a cow

WORDS.

मूढ *adj.* foolish
मुक्ताफलं a pearl
प्रमाणं authority, evidence
इन्दुः the moon
दिलीपः king of the solar race, father of रघु
कोकिलः cuckoo
कण्टकः (कण्टकं) a thorn
इष्टका a brick
नलः name of a king
घटिका a measure of time equal to 24 minutes
प्रकर्षः greatness, intensity
अभिमानः pride, dignity
अन्तःकरणं the heart
कृषीवलः a husbandman
लोहित *adj.* red, red coloured
दर्पणः a looking glass, mirror

शीत *adj*. cool, cold

वल्लभः a husband, lover

सरस्वती the wife of Brahman, the goddess of learning

दिवसः (दिवसम्) a day

चित्रं a picture, painting

उद्यत *adj*. industrious, ready

प्रसिद्ध *adj*. famous, known, renowned

मार्कंडेयः name of a great sage

ROOTS.

ह्लाद् *with* आ *10th conj. Paras. & Atm* to delight.

रञ्ज् *1st conj Paras. & Atm.* to be in love with; to be pleased.

भू *with* अनु *1st conj. Paras.* to experience.

EXERCISE 17.

साधूनामन्तःकरणस्य प्रवृत्तयः प्रमाणं ।

प्रीत्याचार्यः शिष्यमुपदिशति ।

प्रमदानां गतिं हंसा अनुसरन्ति

भीत्या धावन्ति बालकाः ।

कृषीवलो भूमिं कर्षति ।

बुधो मुक्तिं लभते ।

रात्राविन्दुर्जनानाह्लादयति ।

शान्त्या सुखं लभते यतिः ।

शुकस्य चञ्चुर्लोहिता ।

परशुरामो जात्या ब्राह्मणः ।

प्रकृत्या जलं शीतम् ।

दीपे वर्तिर्नास्ति ।
कण्टकैर्वृतिः क्रियते ।
धूर्जटी रतेर्वल्लभमदहत् ।
विद्याया वृद्धये सरस्वतीं पूजयामः ।
शिष्या गुरुभ्यो धनानि वस्त्राणिच * भक्त्या दिशन्ति ।
साधु नीत्या वर्तते ।
मूढास्तनावभिमानं नत्यजन्ति ।
शुक्तिभ्यो मुक्ताफलान्युद्भवन्ति ।
रज्जुं सर्पं मन्यते ।
मुखस्य कान्तिं दर्पणेऽपश्यत् ।

भृत्या नृपतयोऽरींस्ताडयन्ति ।
भूपतिः प्रकृतिषु रजति ।
दिवसस्य षष्टिर्घटिकाः ।
इष्टकाभिर्भित्तिर्विरच्यते ।
शठाः शास्त्रस्य पद्धतौ नगच्छन्ति ।
कोकिला वृक्षाणां श्रेणिषु वसन्ति ।
वसिष्ठस्याज्ञया दिलीपो धेनुमरक्षत् ।
ऋषयः श्रुतेरर्थं स्मृतिभिरुपदिशन्ति ।

---

* च is a copulative conjunction and joins words or assertions together. It does not stand in the same place as '*and*' in English. It is used with each of the words or assertion which it joins together, or is used after the last of the words or assertions so joined, but it can never stand first in a sentence. As रामश्च लक्ष्मणश्च or रामो लक्ष्मणश्च 'Rama *and* Lakshmana'. वा 'or' is an alternative or disjunctive conjunction its position in sanskrit being similar to that of च as; रामो गोपालो वा or रामोवा गोपालोवा 'Rama *or* Gopal.

EXERCISE 18.

(The) husbandmen are industrious by nature.

By means of courage Ravana defeated (his) enemies.

People get milk from the cow.

Kings always protect (their) subjects according to politics.

(He) adorned (his) place of residence with pictures.

People become known in (the) world by means of (their) good deeds.

Nala endured misery with calmness.

Siva was pleased with Markandeya's devotion.

Peace is enjoyed by ascetics.

(The) greatness of talent brings renown.

People wish prosperity.

(The) garden is protected by (the) hedge.

LESSON XI.

Feminine nouns ending in ऊ and ऋ.

(ऊकारान्त ऋकारान्त स्त्रीलिंग शब्दाः)

(वधू *f*) 'a young woman', 'a daughter-in-law'.

	Singular	*Dual*	*Plural.*
Nom.	वधूः*	वध्वौ	वध्वः
Acc.	वधूं	वध्वौ	वधूः
Instr.	वध्वा	वधूभ्याम्	वधूभिः
Dat.	वध्वै	वधूभ्याम्	वधूभ्यः
Abl.	वध्वाः	वधूभ्याम्	वधूभ्यः
Gen.	वध्वाः	वध्वोः	वधूनाम्
Loc.	वध्वाम्	वध्वोः	वधूषु
Voc,	वधु†	वध्वौ	वध्वः

मातृ (*f*) 'mother'.

Nom.	माता	मातरौ	मातरः
Acc.	मातरम्	मातरौ	मातॄः
Instr.	मात्रा	मातृभ्याम्	मातृभिः

Dat.	मात्रे	मातृभ्याम्	मातृभ्यः
Abl.	मातुः	मातृभ्याम्	मातृभ्यः
Gen.	मातुः	मात्रोः	मातृणाम्
Loc.	मातरि	मात्रोः	मातृषु
Voc.	मातः	मातरौ	मातरः

स्वसृ (*f*) 'sister'.

Nom.	स्वसा	स्वसारौ	स्वसारः
Acc.	स्वसारम्	स्वसारौ	स्वसॄः
Instr.	स्वस्रा	स्वसृभ्याम्	स्वसृभिः
Dat.	स्वस्रे	स्वसृभ्याम्	स्वसृभ्यः
Abl.	स्वसुः	स्वसृभ्याम्	स्वसृभ्यः
Gen.	स्वसुः	स्वस्रोः	स्वसॄणाम्
Loc.	स्वसरि	स्वस्रोः	स्वसृषु
Voc.	स्वसः	स्वसारौ	स्वसारः

(36) Feminine nouns ending in ऊ are declined like those in ई having स् (instead of '*none*') as the termination of the nominative singular.

* Hence वधू + स् (the termination of the Nom. sing.) = वधूः

(37) † The vocative singular of Feminine nouns ending in ऊ is made up by shortening the vowel, as; हे वधु.

(38) Feminine nouns ending in ऋ such as मातृ, यातृ, ननान्दृ, दुहितृ (except स्वसृ) belong to nouns of relationship and only differ from the declension of पितृ 'father' in the accusative plural which ends in न् instead of स्; as मातॄः, यातॄः &c.

(39) स्वसृ 'a sister' is declined like धातृ; but the accusative plural is still स्वसॄस् (स्वसॄः).

(40) The feminine bases of nouns or adjectives ending in ऋ are formed by adding ई to them; thus कर्तृ + ई = कर्त्री *f* 'a doer'; दातृ + ई = दात्री *f* 'a giver'; and these nouns are declined like गौरी, नदी &c.

Feminine nouns ending in ऊ.

वधूः a young woman, (2) a daughter in law (3) a bride	चमूः an army
चम्पूः a work composed of prose and poetry	यवागूः sour gruel, rice gruel
	श्वश्रूः mother-in-law

Feminine nouns ending in ऋ.

दुहितृ (दुहिता) a daughter
ननान्दृ (ननान्दा) husband's sister
मातृ (माता) mother
यातृ (याता) husband's brother's wife
स्वसृ (स्वसा) sister

WORDS.

गद्यं prose, prose composition
पद्यं a stanza or verse
काव्यं a poem
दर्शनं sight, seeing
शान्ता sister of Rama
मूत्रं urine
देवकी mother of Krishna
सुभद्रा wife of Arjuna
संपूर्ण *adj.* filled, all
विधिः The Creator (2) fate
कुरू name of a people of India and their country
कंसः King of Mathura, enemy of Krishna

ROOTS.

सेव् *1st conj. Atm.* to serve, wait or attend upon.

क्लृप् (कल्प्) *1st conj. Atm.* to be able, result in, bring about.

कृ *with* अलम् (अलंक्रियेत *Pass. 3rd sing.*) to adorn, beautify.

EXERCISE 19.

गद्यैः पद्यैश्चसंपूर्णं काव्यं
चम्पूरिति † कथ्यते ।
मातुर्दर्शनेन बालो मोदते ।
अर्जुनः कुरूणां* चमू मपश्यत ।
माता दुहितृभ्यो भूषणा ‡
न्यच्छत् ।

शान्ता सीताया ननान्दा ।
भ्रातॄणां भार्या यातरः ।
मूत्राय कल्पते यवागूः ।
वधूः श्वश्रूं सेवते ।
सरस्वती विधेर्वधू : ।
कंसः स्वसारं देवकीमपीडयत् ।

EXERCISE 20.

(The) mother-in law became angry with (her) daughter-in-law.

(She) did not bear (the) anger of (her) husband's sister.

Krishna reads (a) champu.

(The) bride is adorned with jewels.

---

* Always used in the plural.

† The indeclinable इति (properly meaning 'so' 'thus') is often placed after the words quoted or to report what one says or thinks.

‡ Verbs having the sense of 'giving or bestowing' govern the dative of the person to whom the gift is given.

Sudhadra is Krishna's sister.

(The) husband of (one's) daughter is called son-in-law.

(The) child was pleased by (the) words of (his) mother.

(A) mother in law feels affection for (her) son-in-law.

LESSON XII.

Masculine and feminine nouns ending in ए, ऐ, ओ *&* औ

(एकारैकारौकारौकारान्त पुल्लिंग स्त्रीलिंग शब्दाः)

TERMINATIONS.

	Singular	*Dual*	*Plural.*
Nom.	स्	औ	अस्
Acc.	अम्	औ	अस्
Instr.	आ	भ्याम्	भिस्
Dat.	ए	भ्याम्	भ्यस्

	Singular.	*Dual.*	*Plural.*
Abl.	अस्	भ्याम्	भ्यस्
Gen.	अस्	ओस्	आम्
Loc.	इ	ओस्	सु

से *m. f.* 'one with cupid'.

Nom,	सेः	सयौ	सयः
Acc.	सयं	सयौ	सयः
Instr.	सया	सेभ्याम्	सेभिः
Dat.	सये	सेभ्याम्	सेभ्यः
Abl.	सेः	सेभ्याम्	सेभ्यः
Gen.	सेः	सयोः	सयाम्
Loc.	सयि	सयोः	सेषु
Voc.	से	सयौ	सयः

रै (*m. f.*) 'substance', 'wealth'.

Nom.	राः*	रायौ	रायः
Acc.	रायम्	रायौ	रायः

* रायोहालि (VII—2—85)

	Singular.	*Dual.*	*Plural.*
Instr.	राया	राभ्याम्	राभिः
Dat.	राये	राभ्याम्	राभ्यः
Abl.	रायः	राभ्याम्	राभ्यः
Gen.	रायः	रायोः	रायाम्
Loc.	रायि	रायोः	रासु
Voc.	राः	रायौ	रायः

गो (*m.*) a 'bull', *f.* a 'cow'.

Nom.	गौः*	गावौ	गावः
Acc.	गां ‡	गावौ	गाः ‡
Instr.	गवा	गोभ्यां	गोभिः
Dat.	गवे	गोभ्यां	गोभ्यः
Abl.	गोः	गोभ्यां	गोभ्यः
Gen.	गोः	गवोः	गवां
Loc.	गवि	गवोः	गोषु
Voc.	गौः	गावौ	गावः

(40) * Nouns ending in ऐ change their finals into आ before the terminations beginning with consonants.

Hence रै + स् = र् + ऐ + स् = र् + आ + स् = रास् = राः

(41) § Nouns ending in ओ change their finals into औ in all the first five inflexions (except the accusative singular).

Hence गो + स् = ग् + ओ + स् = ग् + औ + स् = गौः

(42) ‡ Nouns ending in ओ change their finals into आ before अम् and अस् (the *singular* and *plural* terminations of the accusative).

Hence गो + अम् = ग् + ओ + अम् = ग् + आ + अम् = गा + अम् = गाम्; similarly गाः

(43) द्यो *f* 'the sky' is declined like गो.

ग्लौ * (*m*) 'the moon'.

	Singular.	*Dual.*	*Plural.*
Nom.	**ग्लौः**	**ग्लावौ**	**ग्लावः**

§ औतोऽम्शसोः (VI—1—93).

* नौ *f*. 'a ship', 'a boat' is similarly declined.

	Singular.	*Dual.*	*Plural.*
Acc.	ग्लावं	ग्लावौ	ग्लावः
Instr.	ग्लावा	ग्लौभ्यां	ग्लौभिः
Dat.	ग्लावे	ग्लौभ्यां	ग्लौभ्यः
Abl.	ग्लावः	ग्लौभ्यां	ग्लौभ्यः
Gen.	ग्लावः	ग्लावोः	ग्लावां
Loc.	ग्लावि	ग्लावोः	ग्लौषु
Voc.	ग्लौः	ग्लावौ	ग्लावः

Words.

पुरुषः a man

अखिल *adj.* all, whole

विप्रः a Brahmin

पतंगः a moth, a bird, a grasshopper (2) the sun

मुखं face, mouth

पारः the other bank or side

निशा night

शकटः (शकटं) a cart

शेखरः a crest, chaplet, diadem, crown, tuft

स्तंभः a pillar, column, post

कलंकः a spot, a stain

क्षेत्रं a field

Roots (*1st Conjugation*).

कांक्ष् *Paras.* to wish, desire, long for, *with* आ to expect, wish for.

प्लु (प्लव्) *Atm.* to float, swim.

धृ *Paras. and Atm.* to seize.

EXERCISE 21.

सः पुरुषो रजन्याभिन्दुं नाभिनन्दति ।

अखिला जना रायं कांक्षन्ति ।

सीताया विवाहे जनको विप्रेभ्यो गाः प्रायच्छत् ।

ग्लावो दर्शनं बालकेभ्यो रोचते ।

नावा जना नद्याः पारं गच्छन्ति ।

निशायां द्यवि तारकाणि प्रकाशन्ते ।

सारथि गोभ्यां शकटं नयति ।

ग्लावं शेखरं धरति शंकरः ।

वारिषु नावः प्लवन्ते ।

पतंगा द्यामुत्पतन्ति ।

EXERCISE 22.

Sitha's face is like (the) moon in splendour.

(The) mother gave much wealth to (her) daughters.

Stars fall from (the) sky.
(A) bullock falls from (the) summit of (a) mountain
(They two) tied (the) boat to (a) pillar.
Sages abandon wealth.
(The) field is ploughed by (the) bulls.
(A) spot is seen in (the) moon.

LESSON XIII.

Imperative Mood (लोट्).

(44) * The Imperative mood is used to express command, entreaty, invitation, wish, permission, blessing &c.

(45) The Imperative has the sense of:—

(a) in the *first* person, *hope*, *wish*, *determination* or *necessacity* ; as

नदीं गच्छाम 'Let (us) go to (the) river.'

(अहम्) करवाणि '(I) must perform'.

(b) in the *second* person, *entreaty*, *advice*, *blessing*; as **मातरं प्रणम** 'Bow to thy mother'; **शुभं भवतु** 'May it fare well'.

(c) in the *third* person, *benediction* or *blessing* and sometimes *gentle command* as **शिवो रक्षतु** 'May Siva protect' **उत्तिष्ठन्तु महाभागाः** 'May the magnanimous persons get up.

(46) The conjugational signs are added on to the roots before the terminations of the imperative.

PARASMAIPADA.

TERMINATIONS.

	Singular	*Dual*	*Plural.*
1st pers.	आनि	आव	आम
2nd pers.	(*none*)	तम्	त
3rd pers.	तु	ताम्	अन्तु

जि (जय) 'to conquer' *1st conj. Paras.*

1st pers.	जयानि	जयाव	जयाम
2nd pers.	जय	जयतम्	जयत
3rd pers.	जयतु	जयताम्	जयन्तु

तुष् 'to be pleased' *4th conj. Paras.*

1st pers.	तुष्याणि	तुष्याव	तुष्याम

	Singular.	*Dual.*	*Plural.*
2nd pers.	तुष्य	तुष्यतम्	तुष्यत
3rd pers.	तुष्यतु	तुष्यताम्	तुष्यन्तु

इष् (इच्छ्) 'to wish', to 'to desire' *6th conj. Paras.*

1st pers.	इच्छानि	इच्छाव	इच्छाम
2nd pers.	इच्छ	इच्छतम्	इच्छत
3rd pers.	इच्छतु	इच्छताम्	इच्छन्तु

चुर् (चोर्) 'to steal' *10th conj.*

1st pers.	चोरयाणि	चोरयाव	चोरयाम
2nd pers.	चोरय	चोरयतम्	चोरयत
3rd pers.	चोरयतु	चोरयताम्	चोरयन्तु

अस् 'to be' *2nd conj. Paras.*

1st pers.	असानि	असाव	असाम
2nd pers.	एधि†	स्तम्*	स्त
3rd pers.	अस्तु	स्ताम्	सन्तु

(47)* Before the dual and plural terminations of the second and third person of the imperative the अ of the root अस् is dropped.

(48) † एधि is the second person singular form of the imperative mood.

अद् 'to eat' *2nd conj. Paras.*

1st pers.	अदानि	अदाव	अदाम
2nd pers.	अद्धि*	अत्तम्	अत्त
3rd pers.	अत्तु	अत्ताम्	अदन्तु

* *Note.* In the case of the root अद् 'to eat' *2nd conj.* the second person singular termination of the imperative is हि.

Hence अद् + हि = अद् + ह् + इ.

(49) ह् coming after any of the first four letters of a class is *optionally* changed into the fourth letter of that class.

Hence अद् + ध् + इ = अद्धि or अद्हि.

Similarly वाक् + हरिः = वाग्हरिः or वाग्घरिः.

WORDS.

प्रातर् *ind.* in the morning

नटी an actress

वृत्तान्तः news, intelligence

सज्ज *adj.* ready, prepared

कान्तारः (कान्तारं) a large or dreary forest

मातुलः a maternal uncle

यानम् a conveyance, vehicle, carriage

अधर्मः sin

कारुण्यं kindness, compassion

इक्षुः sugarcane

शिवालयं a temple of Siva

रणः a battle, or battle-field

दुर्जनः a wicked person

व्याधिः sickness or disease

दीर्धसुमंगली an ever auspicious woman

स्वीय *adj*. one's own

रंगस्थलं a play-house, a theatre, dancing hall, stage

अधुना *ind*. now

वाहकः a porter, coach-driver, a horseman

चातकः name of a bird

गोविन्दः the God Vishnu or Krishna, name of a man

काठिन्यं hard heartedness cruelty, difficulty

रसः juice

मृत *adj*, dead

घटः a jar

कृतिः *f*. action, deed

ROOTS (*1st Conjugation*).

भज् *with* वि *Paras. and Atm*. to divide.

स्था (तिष्ठ्) *with* अनु *Paras.* to carry out, to act according to.
स्मृ (स्मर्) *Paras.* to remember.
शुच् (शोच्) *Paras.* to bewail, grieve for, mourn.
भृ (भर्) *Paras.* to fill, pervade.

नश् *4th conj. Paras.* to perish, to be destroyed.
पूज् *10th conj. Paras. and Atm.* to respect, to adore, honour, worship.

EXERCISE 23.

शिवालयं गच्छतं ।
रंगस्थले नटी नृत्यतु ।
लंकायां राक्षसाञ्जयाम ।
दुष्टैः सह माक्रीडत ।
योधा युद्धाय सज्जाभवत ।
प्रातर्मुखं प्रक्षालय ।
अखिलं वृत्तान्तं कथय ।
विप्रा देवं भजन्तु ।
कन्ये दीर्घसुमंगल्यौ भवतां ।
रामः कान्तारं गच्छतु ।

वीरा रणाय नगरान्निर्गच्छन्तु ।
अधुना भ्रात्रा सह मातुलस्य गृहं गच्छानि ।
इक्षो रसं पिबाव ।
सूदा ओदनं पचन्तु ।
नृप धीर एधि ।
बालकाः पुस्तकं पठन्तु ।
वाहका यानं वहन्तु ।
दाता चिरं जीवतु ।
गोविन्दं स्मरतु ।

भ्रातरो धनं विभजन्तु ।	ब्राह्मणा मा‡ऽधर्ममनुतिष्ठत ।
बाल सर्वदा सत्यं वद ।	* माग्निं वारिणा सिञ्च ।
त्यज काठिन्यं भज कारुण्यं ।	चातका जलमाकांक्षन्तु ।

EXERCISE 24.

Go not in (the) way of evil men.
May God protect all men from miseries.
Do not be angry.
Grieve not for (the) dead.
Come here (my) child.
Read (your) book,
Let (the) diseases of men perish thus.
Child, respect (thy) preceptors.
Girl, give (the) child (a) mango fruit.
Fill (the) jar with milk.
Let me experience (the) fruit of (my) own deeds.
Eat (the) mango fruit.

---

* मा 'not' *ind.* is a particle of prohibition and of negation usually employed with the imperative.

‡ अ 'not' is a prefix corresponding to (Eng-*in*-or-*un*) joined to words beginning with a *consonant* as a substitute for the negative particle न and changed to अन् before words beginning with a *vowel*; as अज्ञानं, 'absence of knowledge' 'ignorance'. अनुत्तम 'having no superior', unsurpassed.

LESSON XIV.

Imperative mood (*Continued*).

ATMANEPADA.

TERMINATIONS.

	Singular	*Dual*	*Plural.*
1st pers.	ऐ	आवहै	आमहै
2nd pers.	स्व	इथाम्	ध्वम्
3rd pers.	ताम्	इताम्	अन्ताम्

लभ् *1st conj. Atm.* 'to get'.

1st pers.	लभै	लभावहै	लभामहै
2nd pers.	लभस्व	लभेथाम्	लभध्वम्
3rd pers.	लभताम्	लभेताम्	लभन्ताम्

युध् *4th conj. Atm.* 'to fight'.

1st pers.	युध्यै	युध्यावहै	युध्यामहै
2nd pers.	युध्यस्व	युध्येथाम्	युध्यध्वम्
3rd pers.	युध्यताम्	युध्येताम्	युध्यन्ताम्

लज्ज् *6th conj. Atm.* to 'feel shame'.

	Singular	*Dual*	*Plural.*
1st pers.	लज्जै	लज्जावहै	लज्जामहै
2nd pers.	लज्जस्व	लज्जेथाम्	लज्जध्वम्
3rd pers.	लज्जताम्	लज्जेताम्	लज्जन्ताम्

अर्थ् *10th conj. Atm.* 'to beg'.

1st pers.	अर्थयै	अर्थयावहै	अर्थयामहै
2nd pers.	अर्थयस्व	अर्थयेथाम्	अर्थयध्वम्
3rd pers.	अर्थयताम्	अर्थयेताम्	अर्थयन्ताम्

WORDS

बाल्यं boyhood, childhood
अनन्तरं *ind.* afterwards
क्षेमः peace, happiness, welfare
विद्वज्जनः a learned or wise man, a sage
परस्वं another's property
उपायः a plan, remedy
राष्ट्रम् a nation, a country
अलिः a bee
रामायणं name of Valmiki's famous epic poem describing the adventures of Rama
मौनम् silence
शोभन *adj.* good

वचनं advice, saying, request, a word

पितृ (पितरौ) *du.* parents

द्रुतम् *adv.* soon, quickly

ROOTS (*1st conjugation*).

लंब् *with* आ *Atm.* to resort to, to depend upon.

स्मि (स्मय्) *with* वि *Atm.* to wonder, to be dismayed.

नी (नय्) *with* आ *Paras. & Atm.* to bring.

अस् *with* अभि *4th conj. Paras.* to learn, study, practise.

मन् *4th conj. Atm.* to think, maintain, regard.

EXERCISE 25.

बाल्ये विद्या अभ्यस्यन्तां ।
शूराणां कथाः श्रूयन्तां ।
खलैस्सह नसंगच्छस्व ।
कथमपराधं क्षमामहै ।
बाला गुरूणां वचनमनुरुध्यध्वं ।
मूर्खौ मौनमालम्बेथां । [तां
आचार्येण छात्रोऽविनयात्ताड्य
योधाः शत्रून्पराजयध्वं
राष्ट्रे प्रजा मोदन्तां ।

अलयो मधु स्वादन्तां ।
परस्वं विषं मन्यस्व ।
ब्राह्मणेभ्यो धनानि दीयन्तां ।
भिक्षुकान्निमन्त्रयध्वं ।
सेवस्व विद्वज्जनं ।
ईश्वरस्य शासनानि क्षेमायानुरुध्यावहै ।
कन्ये श्वशुरमभिवन्दस्वानन्तरं पितुर्गृहं गच्छ ।

EXERCISE 26.

Children, obey (your) parents.

Let (the) two fruits be brought here.

Let (us both) not speak falsehood even in distress.

Let servants go and look for (my) horse.

Do not think Govinda (a) fool.

Let (the) plans be thought over.

Let soldiers fight with and defeat (their) enemies.

Try for (the) good of (the) people.

Let (the) mind attain peace.

Let (my) Ramayana be soon searched.

(We two) were astonished at hearing (the) news; let (it) be told again.

Let (us) invite (our) friend for dinner.

LESSON XV.

Pronouns (सर्वनामशब्दाः)

(50) *The chief classification of pronouns is:—*

Personal Pronouns.	Demonstrative pronouns.	Relative pronoun.	Interrogative pronoun.	Pronouns ending in अ or Pronominals.
अस्मद् 'I or we युष्मद् 'thou or you *भवत् 'your honur	तद् 'that', he she, it एतद् 'this' इदम् 'this' अदस् 'this' or that	यद् 'who' or 'which'	किम् 'who' or 'which'	सर्व 'all विश्व 'all' स्व 'own' &c.

Personal Pronouns §

अस्मद् (I or we).

	Singular	*Dual*	*Plural.*
Nom.	अहम्	आवाम्	वयम्
Acc.	माम् or मा	आवाम् or नौ	अस्मान् or नः

* For the declension of this pronoun see lesson XIX.

§ The declension of the personal pronouns (अस्मद्) & युष्मद्) is the same in all the three genders.

	Singular	Dual	Plural.
Instr.	मया	आवाभ्याम्	अस्माभिः
Dat.	मह्यम् or मे	आवाभ्याम् or नौ	अस्मभ्यं or नः
Abl.	मत्	आवाभ्याम्	अस्मत्
Gen.	मम or मे	आवयोः or नौ	अस्माकम् or नः
Loc.	मयि	आवयोः	अस्मासु

युष्मद् (Thou or you).

Nom.	त्वम्	युवाम्	यूयम्
Acc.	त्वाम् or त्वा	युवाम् or वाम्	युष्मान् or वः
Instr.	त्वया	युवाभ्याम्	युष्माभिः
Dat.	तुभ्यम् or ते	युवाभ्याम् or वां	युष्मभ्यं or वः
Abl.	त्वत्	युवाभ्याम्	युष्मत्
Gen.	तव or ते	युवयोः or वां	युष्माकं or वः
Loc.	त्वयि	युवयोः	युष्मासु

(51) The optional shorter forms of the pronouns (अस्मद् & युष्मद्) *i. e.* मा, मे, नौ, नः & त्वा, ते, वां, वः, are never used at the beginning of a sentence or of a foot of metre; nor they can be used immediately

before the particles च, वा, एव, and हा as, मम पुस्तकम् and not मे पुस्तकम्, तवच ममच (not मेच) प्रीतिरस्ति.

(52) These shorter forms are not used immediately after the vocative case except when a qualifying adjective follows it; as, देवास्मान् (not नः) रक्ष सर्वदा 'Oh God'! protect us always' but हरे दयालो नः पाहि 'Oh Merciful Hari! protect us'.

Pronouns ending in अ.

(53) These pronouns are declined like the corresponding *nouns* except in the following cases which are peculiar to these. The five peculiar terminations are:—

	Singular.		*Plural.*
Dat.	स्मै	Nom.	ई
Abl.	स्मात	Gen.	इषां
Loc.	स्मिन्		

* सर्व *mas*, 'all'

Nom.	सर्वः	सर्वौ	सर्वे

* विश्व 'all', अन्य 'another', इतर 'other', and अन्यतर 'one of two' are similarly declined.

Acc.	सर्वम्	सर्वौ	सर्वान्
Instr.	सर्वेण	सर्वाभ्याम्	सर्वैः
Dat.	सर्वस्मै	सर्वाभ्याम्	सर्वेभ्यः
Abl.	सर्वस्मात्	सर्वाभ्याम्	सर्वेभ्यः
Gen.	सर्वस्य	सर्वयोः	सर्वेषाम्
Loc.	सर्वस्मिन्	सर्वयोः	सर्वेषु
Voc.	सर्व‡	सर्वौ	सर्वे

(54) The terminations which are peculiar to the Pronouns of the feminine gender ending in आ are:–

	Singular.	*Plural.*
Dat.	स्यै	"
Abl.	स्याः	"
Gen.	स्याः	साम्
Loc.	स्याम्	"

Before all these peculiar terminations the final आ is shortened except in the genitive plural: in other respects these pronouns are declined like

‡ Pronouns ending in vowels may also take a vocative case.

their corresponding *nouns* ending in आ.

सर्वा *feminine.*

	Singular.	*Dual.*	*Plural.*
Nom.	सर्वा	सर्वे	सर्वाः
Acc.	सर्वाम्	सर्वे	सर्वाः
Instr.	सर्वया	सर्वाभ्याम्	सर्वाभिः
Dat.	सर्वस्यै	सर्वाभ्याम्	सर्वाभ्यः
Abl.	सर्वस्याः	सर्वाभ्याम्	सर्वाभ्यः
Gen.	सर्वस्याः	सर्वयोः	सर्वासाम्
Loc.	सर्वस्याम्	सर्वयोः	सर्वासु
Voc.	सर्वे	सर्वे	सर्वाः

सर्व *Neuter.*

Nom and Acc.	सर्वं	सर्वे	सर्वाणि

The rest are like those of the corresponding masculine.

(55) एक 'one' follows सर्व in singular only, as; एकः एकं, एकेन, एकस्मै, एकस्मात्, एकस्य, and एकस्मिन्. एक 'chief' follows सर्व in all the numbers.

(56) उभ 'both' is declined like सर्व but only in dual, thus ; Nom Acc. Voc. *mas.* उभौ, *fem.* and *neut* उभे, Ins. Dat. Abl. उभाभ्यां, Gen. Loc, उभयोः.

WORDS.

दक्षिणा money given to Brahmanas

ईशः Siva

सावधान *adj.* attentive

आधारः a support, a receptacle

सद्गुरुः a virtuous preceptor

न्यायः a school of philosophy

कालः time, proper time

समर्पितः *adj.* made over, delivered, committed

प्रत्यहं *ind.* everyday

वयस्यः friend, companion

उपाध्यायः a preceptor

प्राणः *m.* (*plural*) life

उत्तम *adj.* very good, the best

नामधेयं a name

मनोधर्मः passion

वियोगः separation

पाठः a lesson

प्रावीण्यं proficiency

ROOTS (*1st Conjugation*).

अव् *Paras.* to protect.

स्मृ (स्मर्) *Paras. with* वि to forget.

श्रि *Paras. & Atm. with* आ to resort to, to depend upon.

EXERCISE 27.

सर्वेजनाः सद्गुरुमाश्रयन्ते।
वद तव नामधेयं।
तुभ्यं वस्त्राणि दिशामि।
वयस्य मां त्वं माविस्मर।
चिरमहमत्रातिष्ठं।
तत्र त्वं सावधानस्तिष्ठ।
उपाध्यायस्य हस्ते मम पुत्रः समर्पितः
सर्वेषां जनानां नृपतिर्बन्धुः।
वयं सुखेन कालं नयामः।
*सर्वस्माल्लोकात् स्वर्ग उत्तमः।
सर्वस्मिन् शरीरे प्राणास्सन्ति।
अस्मासु कृष्णः श्रेष्ठः।
त्वं पण्डितोऽसि ततस्तुभ्यमहं दक्षिणामयच्छं।
ईशो युष्मान् सदाऽवतु।
सर्वासां श्रुतीनामाधार ईश्वरः।

(57) * A letter of the dental class, followed by ल्, is changed to ल्, the nasalised ल् (लँ्) taking the place of न; तत् + लयः = तल्लयः 'that Laya' विद्वान् + लिखति = विद्वाँल्लिखति 'a learned man writes'.

EXERCISE 28.

We wash our hands everyday with (the) cold water of (the) river.

---

* तोर्लि (VIII—4—60).

Conquer your passions.
Thou art (a) fool.
Are you not my friend?
We two saw (an) ass on (the) road.
Do not you both regard Hari (an) enemy.
May Vishnu save us all from misery.
Do not be sorry at (a) separation from us.
You learnt your lesson; now you may go home.
I asked you where my book was.
You two boys, where is your (two) father.
I learnt Nyaya at Allahabad.
The king attained proficiency in all (the) arts.

LESSON XVI.

Pronouns (*continued*).

Demonstrative, Relative and Interrogative Pronouns.

तद् 'that' *mas.* (he).

	Singular.	*Dual.*	*Plural.*
Nom.	सः	तौ	ते

	Singular.	*Dual.*	*Plural.*
Acc.	तम्	तौ	तान्
Instr.	तेन	ताभ्याम्	तैः
Dat.	तस्मै	ताभ्याम्	तेभ्यः
Abl.	तस्मात्	ताभ्याम्	तेभ्यः
Gen.	तस्य	तयोः	तेषाम्
Loc.	तस्मिन्	तयोः	तेषु

(58) तद् and यद् are declined as if they were त and य in the masculine and the neuter, and ता and या in the feminine.

The Demonstrative pronoun तद् 'that' also serves the purpose of the Third personal pronoun.

तद् *f* '*she*'.

Nom.	सा	ते	ताः
Acc.	ताम्	ते	ताः
Instr.	तया	ताभ्याम्	ताभिः
Dat.	तस्यै	ताभ्याम्	ताभ्यः
Abl.	तस्याः	ताभ्याम्	ताभ्यः

	Singular	*Dual*	*Plural.*
Gen.	तस्याः	तयोः	तासाम्
Loc.	तस्याम्	तयोः	तासु

तद् *n* (It).

Nom. and Acc.	तत्	ते	तानि

The rest are like those of the corresponding *mas.*

एतद् 'this' *masculine.*

Nom.	एषः	एतौ	एते
Acc.	एतं or एनम्	एतौ or एनौ	एतान् or एनान्
Instr.	एतेन or एनेन	एताभ्याम्	एतैः
Dat.	एतस्मै	एताभ्याम्	एतेभ्यः
Abl.	एतस्मात्	एताभ्याम्	एतेभ्यः
Gen.	एतस्य	एतयोः or एनयोः	एतेषाम्
Loc.	एतस्मिन्	एतयोः or एनयोः	एतेषु

(59) The alternative forms of एतद् and इदं in the Acc. and Instr. Sing. and Gen. and Loc. dual are, like those of (अस्मद् and युष्मद्), and ought not to be

used at the beginning of a sentence. Moreover, they can only be used with reference to some one or some thing mentioned in a previous sentence.

एतद् *f.*

	Singular.	*Dual.*	*Plural.*
Nom.	एषा	एते	एताः
Acc.	एताम् or एनाम्	एते or एने	एताः or एनाः
Instr.	एतया or एनया	एताभ्याम्	एताभिः
Dat.	एतस्यै	एताभ्याम्	एताभ्यः
Abl.	एतस्याः	एताभ्याम्	एताभ्यः
Gen.	एतस्याः	एतयोः or एनयोः	एतासाम्
Loc.	एतस्याम्	एतयोः or एनयोः	एतासु

एतद् *n.*

Nom.	एतत्	एते	एतानि
Acc.	एतत् or एनत्	एते or एने	एतानि or एनाति

The rest like the Masculine.

इदम् 'this' *masculine.*

Nom.	अयम्	इमौ	इमे

	Singular.	*Dual.*	*Plural.*
Acc.	इमम् or एनम्	इमौ or एनौ	इमान् or एनान्
Instr.	अनेन or एनेन	आभ्याम्	एभिः
Dat.	अस्मै	आभ्याम्	एभ्यः
Abl.	अस्मात्	आभ्याम्	एभ्यः
Gen.	अस्य	अनयोः or एनयोः	एषाम्
Loc.	अस्मिन्	अनयोः or एनयोः	एषु

इदम् *f.*

Nom.	इयम्	इमे	इमाः
Acc.	इमाम् or एनाम्	इमे or एने	इमाः or एनाः
Instr.	अनया or एनया	आभ्याम्	आभिः
Dat.	अस्यै	आभ्याम्	आभ्यः
Abl.	अस्याः	आभ्याम्	आभ्यः
Gen.	अस्याः	अनयोः or एनयोः	आसाम्
Loc.	अस्याम्	अनयोः or एनयोः	आसु

इदम् *n.*

Nom.	इदम्	इमे	इमानि
Acc.	इदम् or एनत्	इमे or एने	इमानि or एनानि

